"सन्तः सदाभिगन्तव्या यदि नोपदिशन्ति ते" वशि० ।

**अभिगन्तृ** त्रि० अभि+गम–तृच् स्त्रियां ङीप् । युद्धार्थम् आभिमुख्येन १ गन्तरि २ आनुकूल्येन गन्तरि च । "त्वं वरुणोऽभिगन्तेव ब्रह्म" शत०ब्रा० ।

**अभिगम** पु० अभि+आभिमुख्ये आनुकूल्ये वा गम–घञ् । आभिमुख्येन गमने "तवार्हतो नाभिगमेन तृप्तम्" रघुः आनुकूल्येन २गमने "स्वरुच्या क्रियमाणे तु यत्रावश्यक्रिया क्वचित् । नोद्यते नियमः सोऽत्र ऋतावभिगमो यथेति" मीमांसा । भावे ल्युट् । अभिगमनं तत्रैव न० । "ज्येष्ठाभिगमनात् पूर्व्वं तेनाप्यनभिनन्दिता" रघुः । "पापकृन्मुच्यते पापात्तीर्थाभिगमनेन च" स्मृतिः ।

**अभिगम्य** त्रि० अभिगन्तुं शक्यते सौम्याकारत्वात् । आभिमुख्येन गन्तुं शक्ये "अद्यप्रभृति भूतानामभिगम्योऽस्मि शुद्धये" कुमा० । "सोऽभिगम्यश्च पूज्यश्च कर्त्तव्यश्च प्रदक्षिणम्" रामा० । "अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः" रघुः । अभि+गम–ल्यप् । आभिमुख्येन गत्वेत्यर्थे अव्य० "मनुमेकाग्रमासीनमभिगम्य महर्षयः" इति मनुः ।

**अभिगर** पु० अभि+गॄ–स्तुतौ अप् । १ अभितः स्तवे । "अनुष्टुप् तेऽभिगरम्" इति यजु०८,४७ ।

**अभिगामिन्** त्रि० अभिगच्छति अभि+गम–णिनि अभिगन्तरि । "ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा" मनुः । "राजपत्न्यभिगामी च दग्धव्यास्ते कटाग्निना" या०

**अभिगीत** त्रि० आनुकूल्येन गीतः । १ आनुकूल्यार्थं स्तुते २ अभितोगीते च ।

**अभिगुप्ति** स्त्री अभि+गुप्–क्तिन् । १ अभिरक्षणे "तद्व्रजमेवेताभिगुप्त्या आसादयति" श०ब्रा० ।

**अभिगूर्त्त(र्ण)** त्रि० अभि+गुर–क्त वेदे नत्वाभावः । १उक्ते "इष्टं वीतमभिगूर्त्तम्" यजु० २५,२७, "अभिगूर्त्तं ये यजामहे इत्यभिगूर्त्त्योक्तम्" वे०दी० लोके तु अभिगूर्णइत्येव अप्युद्यते त्रि० ।

**अभिगूर्त्ति** स्त्री अभि+सातत्ये गुर–क्तिन् । सततसङ्कल्पे "तेषामभिगूर्त्तिर्न इन्वतु" ऋ०१,१६२,६ । "अभिगूर्त्तिः सङ्कल्पः सर्व्वथा करणीयमिति बुद्धिः" भा० २ अभित उद्यमे च "उतो तेषामभिगूर्त्तिर्न इन्वतु" ऋ०१,१६२,१२, "अभिगूर्त्तिः" उद्यमः भा० । [आनुकूल्यार्थं कृताञ्जलौ ।

**अभिगृहीतपाणि** त्रि० आनुकूल्यार्थं गृहीतः पाणिर्येन ।

**अभिगेष्ण** त्रि० अभि+गै–इष्ण । अभितो गायके "यदेत्वा अभिगेष्णाश्चरन्ति" श्रुतिः ।

**अभिगोप्तृ** त्रि० अभितो गोपायति अभि+गुप–तृच् स्त्रियां ङीप् । अभिरक्षके ।

**अभिग्रस्त** त्रि० अभि+ग्रस–क्त । १ आक्रान्ते २कवलीकृते च

**अभिग्रह** पु० अभि+ग्रह–अप् । (लुट) इति ख्याते प्रकाशहरणे, २ अभियोगे, ३ आभिमुख्येनोद्यमे, ४ गौरवे ५युद्धे च । ल्युटि अभिग्रहणमप्यत्र न० । [१घर्षणे, २मर्द्दने च ।

**अभिघर्षण** न० अभि+घृष–भावे ल्युट् । परस्परसंयोगेन

**अभिघात** पु० अभि+हन–भावे घञ् । १ निःशेषहनने समूलनाशने "दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ" सां०का० । २ ताड़ने । "तडाभिघातादिव लग्नपङ्कै" कुमा० । अभिहन्यतेऽस्मै फलाय उद्दिश्यार्थे बा० घञ् । द्रव्यान्तरक्रियया उत्पादितद्रव्यान्तरसंयोगे, वैशेषिकोक्ते शब्दहेतौ, संयोगिनोर्मिथोविभागजनकक्रियाहेतौ च ३ संयोगभेदे । यथोक्तं "नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म्मेति" वै०सू० । "यः संयोगः शब्दनिमित्तकारणं, यज्जनितं कर्म्म संयोगिनोः परस्परविभागहेतुश्च भवति स संयोगविशेषोऽभिघातः नोदनं तु तद्विलक्षणः संयोगः । ताभ्यामपि प्रत्येकं कर्म्म जन्यते पङ्काख्यायां पृथिव्यां चरणेन नोदनात् चरणाभिघाताच्च कर्म्म जायते तत्र पङ्कः समवायिकारणम् नोदनाभिघातौ यथा यथमसमवायिकारणम् गुरुत्ववेगप्रयत्ना निमित्तकारणानि संयुक्तसंयोगात् नोदनाभिघाताद्वा पङ्के कर्म पङ्कस्थिते घटादावपि, तत्समकालमेव कर्मदर्शनादिति" श०उपस्कारः । "आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म, तथा हस्तसंयोगाच्च मुषले, अभिघातजे मुषले कर्म्मणि व्यतिरेकादकारणं हस्तसंयोगः" वै०सू० तथात्मसंयोगात् हस्तकर्मणि, अभिघातात्मुषलसंयोगाच्च हस्ते कर्म "आत्मजन्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत् क्रिये"त्युक्तिमनुसृत्याह आत्मसंयोगप्रयत्नाभ्यां हस्ते समवायिकारणे कर्म, तस्य च कर्मणः प्रयत्नवदात्मसंयोगोऽसमवायिकारणं प्रयत्नस्तु निमित्तकारणम् प्रयत्नवदात्मसंयोगासमवायिकारणिका च क्रियैव चेष्टा । तथा उत्क्षेपकहस्तसंयोगात् मुषले उत्क्षेपणं कर्म जायते । तथाच प्रयत्नवदात्मसंयुक्तेन हस्तेन यो मुषलस्य संयोगः स तत्रासमवायिकारणम् मुषलं समवायिकारणमिति । उदूखलाभिहतस्य मुषलस्य कर्मण्युत्पतनं जायते तत्र कारणमाह । मुषलादौ उत्पतनकर्मणि अभिघात एव हेतुः, न तु हस्तसंयोगः तस्य तं प्रति कारणत्वेनान्वयासिद्धत्वात् तद्व्यतिरेकेऽपि अभिघात-